## ।। अथ द्वाविंशोऽध्यायः ।। chapter-22

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ यक्षकूपमनुत्तमम् ।
यत्र तु स्नानमात्रेण सर्वपापैः प्रमुच्यते ।। १

पुरा यत्र कुबेरेण सुचिरं परितोषितः ।
महाबलैः समं यक्षैस्तपस्तप्त्वा पितामहः ।। २

मान्धातोवाच :- कुबेरोऽपि तपस्तप्तुं कथं श्रीमालमागतः ।
हेतुना केन विप्रेन्द्र किमस्याभूत् सुदुर्लभम् ।। ३
सर्वमेतन् ममाचक्ष्व प्रसन्नोऽसि यदि द्विज ।। ४

वसिष्ठ उवाच :- पुरा त्रेतायुगे राजन् दशग्रीवेण रक्षसा ।।
गिरिं कैलासमाक्रम्य शम्भोर्विद्रासिता गणाः ।। ५

युद्धं चकार सुमहत् सह वैश्रवणेन सः ।
भग्नं यक्षबलं तत्र निर्जितश्च धनेश्वरः ।। ६

रत्नैरनेकैर्मणिभिर्दिव्यैर्योग्यैर्विभूषणैः ।
पूर्णं पुष्पकमादाय विमानं व्योम्नि राक्षसः ।।
ययौ लंकामभिमुखः सहनैर्ऋतकोणपैः ।। ७

-0-

१ बी ई- यत्रप्लवनमात्रेण
२ बी ई- ययौलंकामिमुखः सह

(ए३) युद्धं
(ए४) ययौलंकाभिमुखःस

अकृत्यं वा भवेत्किंचित्कृतमज्ञानतस्त्वया ।।
कोपितो वा मुनिः कश्चिद् दूरात् कर्प्रोक्तो ह्यसंगमात् ।। १५

किं वा कुलकलंकेन स्वगृहोत्थितमन्युना ।
रावणेन परामृश्य हृदि दाहः कृतस्तव ।। १६

विषादमवधूयाशु ब्रूहि वत्स यथातथं ।
न शोकस्त्वादृशानांहि वत्स संश्रयते मनः ।। १७

शोकाम्बुधे सुदुःपारे वत्स मुक्तिपदेषिणः ।।
बुद्धिप्लवं समासाद्य न निमज्जन्ति पंडिताः ।। १८

आश्वस्य तन्ममाचक्ष्व सर्वं वै म्लानिकारणम् ।। १९

वैश्रवण उवाच :- प्रसह्याहं पराभूत स्तात संग्राममूर्द्धनि ।।
महेशवरतुष्टेन रावणेन दुरात्मना ।। २०

गतः पुष्पकमादाय निर्मितं विश्वकर्मणा ।
साराणि च महार्हाणि रत्नानि सुबहून्यपि ।। २१

-0-

(ए१) रावणेन

(ए२) दुरात्मना

अतोऽत्रवत: पार्श्वे दीनस्तव समाययौ ।।
किं करोमि विना पुत्रं मृत्युं नाप्नोति ते सुत: ।। २२

किं वृथा तेन जातेन मातुर्यौवनहारिणा ।
य: परेण पराभूत: प्रतिकर्तुं न वाञ्छति ।। २३

तस्मादहं तपस्तप्स्ये सह यज्ञैर्महात्मभि: ।
अचीर्णतपसां तात विपदो हि पदे पदे ।। २४

विश्रवोवाच :- लोक: सन्तापितस्तेन तथा धनद रक्षसा ।।
अचिरेण यथा नाशं यास्यत्येष न संशय: ।। २५

पापेन च समृद्धि: स्याद् गृहेषु कलुषात्मनाम् ।
सा प्राणान्तकरी ज्ञेया शोकेन स्थूलता यथा ।। २६

ततो मुञ्च विषादं त्वं किन्नरेश्वर मा शुच ।
श्रीमालमथवा याहि तप: सिद्धिं यदीच्छसि ।। २७

-o-

१ बी ई स्तात
२ बी शोथेन
ई शोफेन

श्लोक जगाम विश्वरेश्वर पार्श्वे

क्षेत्राणामुत्तमं क्षेत्रं तीर्थानां तीर्थमुत्तमम् ।
श्रीमालं भरते वर्षे सिध्यन्तीह तपस्विन: ।। २८

वसिष्ठ उवाच :- निशम्यैतत्पितुर्वाक्यं हितं विश्रवसो मुने: ।
स प्रणम्य जगामाशु श्रीमालं तपसे नृप ।। २९

मणिभद्रप्रभृतिभिर्यक्षैरनुगतस्तदा[1] ।
उत्तराशाधिप: श्रीमान् देवैरिव पुरंदर: ।। ३०

श्रीमालं प्राप्य भूपाल धनाध्यक्षोऽनुगै: सह ।
विवेश विवरं कृत्वा तप्तुं रावणशंकित: ।। ३१

प्रज्वाल्य पावकं तत्र होमं कुर्वन् महायशा: ।
राजन्नाराधयामास ब्रह्माणं कमलोद्भवम् ।। ३२

पुष्पैर्धूपै: स नैवेद्यैर्बलिभिश्च पृथग्विधै: ।
वेदगर्भैस्तथा स्तोत्रैर्देवमर्च्चयतश्चिरकात् ।। ३३

-o-o-

१ ए मणिभद्रभृति

उपवासपरस्थास्य कृशं धमनिसंयुतम् ।
वीक्ष्य देहं धनेशस्य यदा विव्यथिरे नृप ।। ३४

ते परस्परमामन्त्र्य[४] दुःखार्ता गुह्यकोत्तमाः ।।
ऊचुः प्रणम्य भर्तारं कदाचिन् मधुरा गिरः ।। ३५

मणिभद्र उवाच :- तपसो भीषणादस्मान्नाथ चेतो निवर्तय ।
यतपो देहनाशाय तदर्हन्ति[५] पण्डिताः ।। ३६

स्थूणाक्ष उवाच :- इदं तपो महावीर्य[१] राजराज विराजते ।
दरिद्रस्य न ते नाथ सख्युश्चन्द्रकिरीटिनः[६] ।। ३७

महाघोण उवाच :- विरम्यतामितो नाथ तपसो[२]ऽद्य तपोधन ।
त्वामाराधयते सर्वो लोको हि स्वार्थसिद्धये ।। ३८

पिंगाक्ष उवाच :- जगतामपकाराय[३] वर्धमानो दशाननः ।
वृक्षादिव फलं पक्वं स्वयमेव पतिष्यति ।। ३९

-०-

१ ई सी रौद्रं
२ ई सी तपसात्वं धनेश्वर
३ ई सी मपकार्यो

४ ए मामन्त्र्य
५ ए तदर्हन्ति
(ए ६) श्चन्द्रीकिरीटिनः

वसिष्ठ उवाच :- इत्युक्तोऽपि स यक्षेन्द्रः प्रणतैर्यक्षपुंगवैः ।
शम्भुध्यानार्पितमना न तेषां वाक्यमाददे ॥ ४०

एवं तपः परस्यास्य ग्रीष्मकालः समाययौ ।
चण्डांशुकिरणश्रेणिनिकृष्यमाणमहीरसः ॥ ४१

तस्मिन्नृतौ नरश्रेष्ठ निर्गत्य विवराद्बहिः ।
उपचक्राम यक्षेन्द्रः कर्तुं पञ्चाग्निसाधनम् ॥ ४२

परितस्तस्य पंचाग्नीन्नित्यं साधयतो भृशम् ॥
कदाचित्सुमहान् वायुर्ववौ कर्करकर्कशः ॥ ४३

स्थगयन् गगनं राजन्नुत्थितैः रेणुसंचयैः ।
पिधाय पाणिपद्माभ्यां लोचनानि समंततः ।
मणिभद्रप्रकृतयो यक्षास्तस्थुरधोमुखाः । ४४

अथ पार्श्वकुशानां हि स्रस्तरासनपङ्क्तयः ॥
उद्भूता न्यपतन् वह्नौ ततो ज्वालाभ्यवर्तत ॥ ४५

-०-०-

३ बी ई मारुतोर्मिभिः
बी अभ्यवर्षं तेतियुक्त सयात्
सी क्लैतिपाठी युक्त सयात
४ ई माणिभद्र २ मणि ६ ई ततं
५ सी बी ई शम्भुध्यानार्पितै

ततोऽपि पावकज्वालाकुले तत्र धनेश्वर: ।
नासनाच्चलित: किंचित् ध्यानसंगतलोचन: ।। ४६

तेनाभूज्जगतां स्त्रष्टा परितुष्ट: पितामह: ।
वेगात्समीपमागत्य ब्रह्मलोकात्कमण्डलो: ।।
सिषेच सलिलैरग्निज्वालाकोटीरवेष्टितम् ।। ४७

अथ शान्ततनुं राजन्नुन्मीलितदृशं तदा ।
पितामह: समाश्वास्य प्रोवाचेदं धनेश्वरम् ।। ४८

ब्रह्मोवाच :- वत्सकोऽयं दिगिन्द्रत्वे तप: कर्तुं तवाग्रह: ।
आरात्प्रज्वलितं शस्यं न वेत्सि ज्वलनं यत: ।। ४९

भूय: किन्ते चिकीर्षास्ति प्राप्तुं वा दुर्लभं पदम् ।।
दुर्ज्जयं ते रिपुं जेतुं वरं वरय सुव्रत: ।। ५०

वैश्रवण उवाच :- अस्ति देव दुराचारो रावणो रक्षसां पति: ।
तेनागत्य गृहान्नाथ जित्वा युधि हृतं धनं ।। ५१

-०-०-

१ ई बी ध्यानमीलितलोचन:
५ ई तथाग्रह:
६ ई हतंयुधि:

(ए२) परितुष्ठ
(ए३) ज्वालाकोठीकृतांहितम्
(ए४) तपस्कर्तुं

विमानं पुष्पकं नाम गृहीतं मम पश्यत: ।।
ततोऽपमानितमना: सह्यक्षै: प्रियैषिभि: ।।
अत्रागत्य मयातस्य प्रविष्टो विवरान्तरम् ।। ५२

तस्मात्त्राहि चतुर्वक्त्र मामनाथं कृपा यदि ।।
महिमानं समासाद्य लोकेश त्वदनुग्रहात् ।।
रक्षसो वरदर्पिष्ठाज्जीवेत्क: प्राप्य दुर्दशाम् ।। ५३

ब्रह्मोवाच :- मा भैषी: पुत्र तस्मात्त्वं याहि यक्ष: सहालकाम् ।
पुष्पकस्यापहारोऽयं तव चैव विमानना ।।
राक्षसेन्द्राद्दशग्रीवाद् दृष्टमेतत् पुरातनम् ।। ५४

इक्ष्वाकोर्विपुले वंशे राज्ञो दशरथाद्भुवम् ।।
भविता तद्वधार्थाय रामो नाम महाबल: ।। ५५

विष्णोरंशावतारोऽसौ न चिरादारहारिणम् ।
तं हनिष्यति दुर्धर्षो प्राप्स्यसि पुष्पकं तदा ।। ५६

-०-०-

६ ई मासाद्य:
२ ई मामैषा:
६ ई भवितातद्वधा

(ए१) माहिमान्सासद्य
(ए२) मामैषी:
(ए४) तनै
(ए५) भवितैदद्वधार्थाय

पूर्वमिव महाबाहो संविग्नै[१]रमरै[२]स्ततः ।
सूक्तो[३]यमु[४]पायो ऽस्ति वरं त्वमपरं वृणु ।। ५७

धनेश्वर उवाच :- यदि देयो वरो देव वराहो यदि ह्यप्यहम् ।
मन्नाम्ना तदिदं तीर्थं ख्यातमस्तु महीतले ।। ५८

ब्रह्मोवाच :- धनेश यन्मया वारि त्वयि क्षिप्तं कमण्डलोः
तेनायं विवरः पूर्णो निलिल्ये यत्र गुह्यकैः ।। ५९

तस्मात्तीर्थमिदं लोके यक्षकूप इति श्रुतम् ।।
विश्रुतं त्रिषु लोकेषु भविष्यति न संशयः ।। ६०

ये ऽत्र स्नानं करिष्यन्ति यक्षकूपे मनीषिणः ।
नापमानकृतिस्तेषामाधिरुत्पत्स्यते हृदि ।। ६१

यश्च यक्षालये यक्षानर्च[५]यिष्यंति भक्तितः।
यक्षकूपे जलं स्पृष्ट्वा[६] वाञ्छितं स प्रपत्स्यते ।। ६२

-०-

१ बी संविग्नै
३ बी ई सूक्तो
५ ए नर्च्च
६ ए स्पृष्ट्व
(ए३) सम्विज्ञ
(ए४) सूक्ता

धनेश्वर तव प्रीत्या रथं दास्यन्ति येऽत्र वै ।
विमानवरमारूढा विचरिष्यन्तिते चिरम् ।। ६३

पितृणां श्राद्धदानेन परा तृप्तिर्भविष्यति ।।
कृष्णपक्षेऽश्विनि मासे चतुर्दश्यां धनाधिप ।
येऽत्र स्नानं करिष्यन्ति तेषां वंशे न निर्धना: ।। ६४

वसिष्ठ उवाच :- इति दत्वा वरं देव: कुबेराय प्रजापति: ।
अदृश्योऽभून् महाराज मन्त्रग्राम इवाशु च ।। ६५

अथ प्रीतमना राजन्राजराजस्त्वरान्वित: ।
तत्रांशेन स्थितिं कृत्वा यथागतमितो गत: ।। ६६

तत: प्रभृति तत्तीर्थं यक्षकूपमिति श्रुतम् ।
श्रीतीर्थेऽपि राजेन्द्र हन्ति पापानि देहिनाम् ।। ६७

-०-

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्म्यविभागे तृतीय परिच्छेदे श्रीमाल माहात्म्ये यक्षकूप महात्म्यं नामद्वाविंशोऽध्याय: ।। २२

६४ श्लोकस्य प्रथम पंक्ति नास्ति

५ इ थागतमि

१ ए दास्यान्ति

२ ए ष्यन्ततो चिरम्

३ ए दानने

४ ए दैश्याधनाधिप